वर्तते। अथ खलु विपाणमध्ये वसिष्ठशिला नाम प्रथम आश्रमः। द्वितीयः कृष्णशिलाः। तस्मिन् वसिष्ठः समतपत्। विश्वामित्रजमदग्नी जामदग्ने तपतः। गौतमभरद्वाजौ सिंहौ प्रभवे तपतः। गुंगुगुंगुवासे तपति। ऋषिर्ऋषिद्रोणे ऽभ्यतपत्। अगस्त्यो ऽगस्त्यतीर्थे तपति। दिव्यत्रिर्हे तपति। स्वयंभूः कश्यपः कश्यपतुङ्गे ऽभ्यतपत्। उलवृकक्षुलरक्षुः श्वा वराहचिल्वटिबब्रुकाः[1] सर्पदंष्ट्रन संहनुकृण्वानाः।[2] कश्यपतुङ्गदर्शनात् सरणवाटात् सिद्धिर्भवति। ब्राह्मयं वर्षसहस्रमृषिवने ब्रह्मचार्येकपादेनातिष्ठत्[3] द्वितीयं वर्षसहस्रं मूर्धन्येवामृतस्य धारामाधारयत्। ब्राह्माण्यष्टाचत्वारिंशद् वर्षसहस्राणि सलिलस्य पृष्ठे शिवो ऽभ्यतपत्। तस्मात् तस्मात् तपसो भूय एवाभ्यतपत्। तदप्येता ऋचो ऽभिवदन्ति—**प्राणापानौ जनयन्**[4] इति ब्राह्मणम् ॥८॥

**एकपाद् द्विपद्**[5] इति। वायुरेकपात्। तस्याकाशं पादः। चन्द्रमा द्विपात्। तस्य पूर्वपक्षापरपक्षौ पादौ। आदित्यस्त्रिपात्। तस्येमे लोकाः पादाः। अग्निः षट्पादः। तस्य पृथिव्यन्तरिक्षं द्यौराप ओषधिवनस्पतय इमानि भूतानि पादाः। तेषां सर्वेषां वेदा गतिरात्मा प्रतिष्ठिताश्चतस्रो ब्रह्मणः शाखाः। अथो आहुः—षडिति, मूर्तिराकाशश्चेति। ऋचा मूर्तिः। याजुषी गतिः। साममयं तेजः। भृग्वङ्गिरसा माया। एतद् ब्रह्मैव यज्ञश्चतुष्पाद् द्विः संस्थित इति। तस्य भृग्वङ्गिरसः संस्थे। अथो आहुः—एकसंस्थित इति। यद्धोतर्चा मण्डलैः करोति, पृथिवीं तेनाप्याययति। एतस्यां ह्यग्निश्चरति। तदप्येतदृचोक्तम्—**अग्निवासाः पृथिव्यसितज्ञूः**[6] इति। यदध्वर्युर्यजुषा करोति, अन्तरिक्षं तेनाप्याययति। तस्मिन् वायुर्न निविशते कतमच्चनाहरिति। तदप्येतदृचोक्तम्—

१. 'बभ्रुकाः' इति पुणे-कोश रा० पाठः। २. अस्फुटोऽयं सन्दर्भः।
३. पुणे-कोश रा० सम्मतः पाठः। 'आतिष्ठति' इति गास्ट्रपाठः।
४. द्र०-पृ० २७ टि० ५॥
५. अथर्व० (पै० सं०) १८।२३।४॥ अथर्व० (शौ० सं०) १३।२।२७॥
६. अथर्व० (पै० सं०) १७।३।२॥ अथर्व० (शौ० सं०) १२।१।२१॥

**अन्तरिक्षे पथिभिर्ह्रीयमाणो न नि विशते कतमच्चनाहः ।**
**अपां योनिः प्रथमजा ऋतस्य क्व स्विज्जातः कुत आ बभूव ॥**[1] इति ।

यदुद्गाता साम्ना करोति, दिवं तेनाप्याययति । तत्र ह्यादित्यः शुक्रश्चरति । तदप्येतदृचोक्तम्—**उच्चा पतन्तमरुणं सुपर्णम्**[2] इति । यद् ब्रह्मर्चा काण्डैः करोति, अपस्तेनाप्याययति । चन्द्रमा ह्यप्सु चरति । तदप्येतदृचोक्तम्—**चन्द्रमा अप्स्वन्तः**[3] इति । तासामोषधिवनस्पतयः काण्डानि । ततो मूलकाण्डपर्णपुष्पफलप्ररोहरसगन्धैर्यज्ञो वर्तते । अद्भिः कर्माणि[4] प्रवर्तन्ते । अद्भिः सोमो ऽभिषूयते । तद् यद् ब्रह्माणं कर्मणि[5] कर्मण्यामन्त्रयति, अपस्तेनानुजानाति । एषो ह्यस्य भागः । तद् यथा भोक्ष्यमाणो ऽप एव प्रथममाचामयेदप उपरिष्टाद्, एवं यज्ञो ऽद्भिरेव प्रवर्तते, अप्सु संस्थाप्यते । तस्माद् ब्रह्मा[6] पुरस्ताद्धोमसंस्थितहोमैर्यज्ञो[6] वर्तते । अन्तरा हि पुरस्ताद्धोमसंस्थितहोमैर्यज्ञं परिगृह्णाति । अन्तरा हि भृग्वङ्गिरसो वेदानादुह्य भृग्वङ्गिरसः सोमपानं मन्यन्ते । सोमात्मको ह्ययं वेद ।[7] तदप्येतदृचोक्तम्—**सोमं मन्यते पपिवान्**[8] इति । तद् यथेमां पृथिवीमुदीर्णां ज्योतिषा धूमायमानां वर्षं शमयति, एवं ब्रह्मा भृग्वङ्गिरोभिर्व्याहृतिभिर्यज्ञस्य विरिष्टं शमयति । अग्निरादित्या यम इत्येते[9] ऽङ्गिरसः । एत इदं सर्वं समाप्नुवन्ति । वायुरापश्चन्द्रमा इत्येते भृगवः । एत इदं सर्वं समाप्याययन्ति । एकमेव संस्थं भवतीति ब्राह्मणम् ॥९॥

---

१. अथर्व० (पै० सं०) १।१०७।४ । तत्र 'ह्रीयमाणः' 'विशते' इत्यनयोः स्थाने यथासंख्यम् 'ईयमानः', 'मिषते' इति पाठौ भेदेनोपलभ्येते । ऋ० १०।१६८।३ इत्यत्र च 'योनिः' 'ऋतस्य' इत्यनयोः स्थाने यथासंख्यं 'सखा' 'ऋतावा' इति पाठौ श्रूयेते ।

२. अथर्व० (पै० सं०) १८।२४।३॥ अथर्व० (शौ० सं०) १३।२।३६॥

३. अथर्व० (पै० सं०) १८।३२।१४॥ अथर्व० (शौ० सं०) १८।४।८९ ॥ ऋ० १।१०५।१॥

४. 'कर्णाणि' इति गा० पाठः । ५. 'कर्णणि' इति गा० पाठः ।

६. अनयोरन्यतरत् पदमतिरिच्यते । 'यज्ञे' इति वा पाठः स्यात् ?

७. संशोधितः पाठः । कोशेषु विसर्गरहितः पाठ उपलभ्यते ।

८. अथर्व० (पै० सं०) १८।१।३॥ अथर्व० (शौ० सं०) १४।१।३॥

९. 'आदित्याय शमयत्येते' इति गास्ट्रपाठः । 'आदित्याय म इत्येते' इति रा० पाठः ।

विचारी ह् वै काबन्धिः कबन्धस्याथर्वणस्य पुत्रो मेधावी मीमांसको ऽनूचान आस। स ह स्वेनातिमानेन मानुषं वित्तं नेयाय। तं मातोवाच—त एवैतदन्नमवोचन्, त इम एषु कुरुपञ्चालेष्वङ्गमगधेषु काशिकौशलेषु शाल्वमत्स्येषु सवशोशीनरेषूदीच्येष्वन्नमदन्तीति। अथ वयं तवैवातिमानेनानाद्याः[1] स्मः। वत्स वाहनमन्विच्छेति। स मान्धातुर्यौवनाश्वस्य सार्वभौमस्य राज्ञः सोमं प्रसूतमाजगाम। स सदो ऽनुप्रविश्यर्त्विजश्च यजमानं चामन्त्रयामास—तद् याः प्राच्यो नद्यो वहन्ति याश्च दक्षिणाच्यो याश्च प्रतीच्यो याश्चोदीच्यस्ताः सर्वाः पृथङ्नामधेया इत्याचक्षते, तासां समुद्रमभिपद्यमानानां छिद्यते नामधेयं समुद्र इत्याचक्षते। एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः स ब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वाख्यानाः सपुराणाः सस्वराः ससंस्काराः सनिरुक्ताः सानुशासनाः सानुमार्जनाः सवाकोवाक्याः। तेषां यज्ञमभिपद्यमानानां छिद्यते नामधेयं यज्ञ इत्येवाचक्षते ॥१०॥[2]

भूमेर्ह वा एतद् विच्छिन्नं देवयजनं यदप्राक्प्रवणं यदनुदक्प्रवणं यत् कृत्रिमं यत् समविषमम्। इदं ह त्वेव देवयजनं यत् समं समूलमविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णमिव भवति, यत्र ब्राह्मणस्य ब्राह्मणतां विद्याद् ब्रह्मा ब्रह्मत्वं करोतीति। वोचे[3] छन्दस्तद् न विन्दामो येनोत्तरमेमहीति। तान् ह पप्रच्छ—किं विद्वान् होता हौत्रं करोति, किं विद्वानध्वर्युराध्वर्यवं करोति, किं विद्वानुद्गातौद्गात्रं करोति, किं विद्वान् ब्रह्मा ब्रह्मत्वं करोतीति ? वोचे[3] छन्दस्तद् न विन्दामो येनोत्तरमेमहीति। ते ब्रूमः—वागेव होता हौत्रं करोति। वाचो हि स्तोमाश्च वषट्काराश्चाभिसंपद्यन्ते। ते ब्रूमः—वागेव होता, वाग् ब्रह्म, वाग् देव इति। प्राणापानाभ्यामेवाध्वर्युराध्वर्यवं करोति।

---

१. गास्ट्रसंशोधितः पाठः। 'नेनाध्घास्मो' '—नेनाद्वास्मो' इति कोशेषु पाठौ।

२. गो० ब्रा० १।२।१०—१४ तु० शत०ब्रा० ३।१।१॥

३. सन्दिग्धम्।

प्राणप्रणीतानि ह भूतानि, प्राणप्रणीताः प्रणीताः । ते ब्रूमः—प्राणापानावेवाध्वर्युः, प्राणापानौ ब्रह्म, प्राणापानौ देव इति । चक्षुषैवोद्गातौद्गात्रं करोति । चक्षुषा हीमानि भूतानि पश्यन्ति । अथो चक्षुरेवोद्गाता, चक्षुर्ब्रह्म, चक्षर्देव इति । मनसैव ब्रह्मा ब्रह्मत्वं करोति । मनसा हि तिर्यक् च दिश ऊर्ध्वं च, यच्च किं च मनसैव करोति तद् ब्रह्म । ते ब्रूमः—मन एव ब्रह्मा, मनो ब्रह्म, मनो देव इति ।।११।।

तद् यथा ह वा इदं यजमानश्च याजयितारश्च दिवं ब्रूयुः पृथिवीति, पृथिवीं वा[1] द्यौरिति ब्रूयुः, तदन्यो नानुजानात्येताम्, एवं नानुजानाति यदेतद् ब्रूयात् । अथ नु कथमिति ? होतेत्येव होतारं ब्रूयाद्, वागिति वाचं, ब्रह्मेति ब्रह्म, देव इति देवम् । अध्वर्युरित्येवाध्वर्युं ब्रूयात्, प्राणापानाविति प्राणापानौ, ब्रह्मेति ब्रह्म, देव इति देवम् । उद्गातेत्येवोद्गातारं ब्रूयात्, चक्षुरिति चक्षुः, ब्रह्मेति ब्रह्म, देव इति देवम् । ब्रह्मेत्येव ब्रह्माणं ब्रूयाद्, मन इति मनः, ब्रह्मेति ब्रह्म, देव इति देवम् ।।१२।।

नानाप्रवचनानि ह वा एतानि भूतानि भवन्ति । ये चैवासोमपं याजयन्ति ये च सुरापं ये च ब्राह्मणं विच्छिन्नं सोमयाजिनं तं प्रातः समित्पाणय उपोदेयुः—उपायामो भवन्तमिति । किमर्थमिति ? यानेव नो भवांस्तान् ह्यः प्रश्नानपृच्छत् तान्[2] एव नो भवान् व्याचक्षीतेति[3] । तथेति । तेभ्य एतान् प्रश्नान् व्याचचष्टे । तद् येन ह वा इदं विद्यमानं चाविद्यमानं चाभिनिदधाति तद् ब्रह्म । तद् यो वेद स ब्राह्मणो ऽधीयानो ऽधीत्याचक्षत[4] इति ब्राह्मणम् ।।१३।।

---

१. गास्ट्रसंशोधितः पाठः । कोशेषु 'वाग्' इति पाठः ।

२. गास्ट्रसंशोधितः पाठः । कोशेषु 'यान्' इत्येव ।

३ गास्ट्रसंशोधित पाठः । कोशेषु '—येति' '-यति' इत्येव ।

४. अत्र 'ऽधीतीत्याचक्षत' इति पाठः स्यात् ?

अथातो देवयजनानि। आत्मा देवयजनम्। श्रद्धा देवयजनम्। ऋत्विजो देवयजनम्। भौमं देवयजनम्। तद् वा एतदात्मा देवयजनं यदुत्व्या-यच्छमानो वानुपव्यायच्छमानो वा शरीरमधिवसति। एष यज्ञः, एष यजते, एतं यजन्ते, एतद् देवयजनम्। अथैतच्छ्रद्धा देवयजनम्। यदैव कदाचिदादध्यात्, श्रद्धा त्वेवैनं नातीयात्, तद् देवयजनम्। अथैतदृत्विजो देवयजनम्। यत्र क्वचिद् ब्राह्मणो विद्यावान्[1] मन्त्रेण करोति तद् देव-यजनम्। अथैतद्भौमं देवयजनम्। यत्रापस्तिष्ठन्ति यत्र स्यन्दन्ति, प्र तद् वहन्त्युद्वहन्ति, तद् देवयजनम्। यत् समं समूलमविदग्धं प्रतिष्ठितं प्रागुद-क्प्रवणं समं समास्तीर्णमिव भवति, यस्य श्वभ्र ऊर्मो वृक्षः पर्वतो नदी पन्था वा पुरस्तात् स्यात्। न देवयजनमात्रं पुरस्तात् पर्यवशिष्येत्। नोत्तरतो ऽग्नेः पर्युपसीदेरन्निति ब्राह्मणम् ।।१४।।

अदितिर्वै प्रजाकामौदनमचत्। तत उच्छिष्टमाश्नात्[2]। सा गर्भमधत्त। तत आदित्या अजायन्त। य एष ओदनः पच्यत, आरम्भणमेवैतत् क्रियत आक्रमणमेव। प्रादेशमात्रीः समिधो भवन्ति। एतावान् ह्यात्मा प्रजा-पतिना संमितः। अग्नेर्वै या यज्ञिया तनूरश्वत्थे तया समगच्छत। एषास्य घृत्या[3] तनूर्यद् घृतम्। यद् घृतेन समिधो ऽनक्ति, ताभ्यामेवैनं तत् तनूभ्यां समर्धयति। यद् निर्मार्गस्थादधाति, अवगूर्त्या[4] वै वीर्यं क्रियते। यद् निर्मार्गस्यादधात्यवगूर्त्या[4] एव। संवत्सरो वै प्रजननम्। अग्निः प्रजननम्। एतत् प्रजननम्। यत् संवत्सर ऋचाग्नौ समिधमादधाति, प्रजननादेवैनं तत् प्रजनयिता प्रजनयति। अभक्तर्तु[3] वै पुरुषः। न हि तद् वेद यमृतुम्[3] अभिजायते। यद् नक्षत्रं तदाप्नोति। य एष ओदनः पच्यते, योनिरेवैषा क्रियते। यत् समिध आधीयन्ते, रेतस्तद् धीयते[3]। संवत्सरे[3] वै रेतो हितं प्रजायते। यः[3] संवत्सरे पर्येते ऽग्निमाधत्ते, प्रजा-

१. रा० स्वीकृतः पाठः। कोशेषु 'विद्याविद्' इति पाठः इति गास्ट्रः।

२. गास्ट्रसंशोधितः पाठः। कोशेषु 'अश्नात्' इति पाठः।

३. गास्ट्रसंशोधितः पाठ.। पाठशोधोऽत्र काठकसंहिताम् अनुसृत्य विहितः।

४. गास्ट्रसंशोधितः पाठः। 'अवकूत्या' इति कोशेषु।